# सुन्दरकाण्ड पञ्चम सर्गः(५) -॥ भवनविचयः ॥

ततः स मध्यं गतमंशुमन्तं
ज्योत्स्ना वितानं महदुद्वमन्तम् ।
ददर्श धीमान्दिवि भानुमन्तं
गोष्ठे वृषं मत्तमिव भ्रमन्तम् ॥ १ ॥

लोकस्य पापानि विनाशयन्तं
महोदधिं चापि समेधयन्तम् ।
भूतानि सर्वाणि विराजयन्तं
ददर्श शीतांशु मथाभियान्तम् ॥ २ ॥

या भाति लक्ष्मीर्भुवि मन्दरस्था
तथा प्रदोषेषु च सागरस्था ।
तथैव तोयेषु च पुष्करस्था
रराज सा चारु निशाकरस्था ॥ ३ ॥

हंसो यथा राजत पञ्जरस्थः
सिंहो यथा मन्दर कन्दरस्थः ।
वीरो यथा गर्वित कुञ्जरस्थः
चन्द्रोऽपि बभ्राज तथाम्बरस्थः ॥ ४ ॥

स्थितः ककुद्मानिव तीक्ष्ण शृङ्गो
महाचलः श्वेत इवोच्च शृङ्गः ।
हस्तीव जाम्बूनद बद्ध शृङ्गो
रराज चन्द्रः परिपूर्ण शृङ्गः ॥ ५ ॥

विनष्ट शीताम्बुतुषार पङ्को
महाग्रह ग्राह विनष्टपङ्कः ।
प्रकाश लक्ष्म्याश्रय निर्मलाङ्को
रराज चन्द्रो भगवान् शशाङ्कः ॥ ६ ॥

शिलातलं प्राप्य यथा मृगेन्द्रो
महारणं प्राप्य यथा गजेन्द्रः ।
राज्यं समासाद्य यथा नरेन्द्रः
तथा प्रकाशो विरराज चन्द्रः ॥ ७ ॥

प्रकाश चन्द्रोदय नष्टदोषः
प्रवृद्धरक्षः पिशिताशदोषः ।
रामाभिरामेरित चित्तदोषः
स्वर्ग प्रकाशो भगवान् प्रदोषः ॥ ८ ॥

तन्त्रीस्वनाः कर्णसुखाः प्रवृत्ताः
स्वपन्ति नार्यः पतिभिः सुवृत्ताः ।
नक्तञ्चराश्चापि तथा प्रवृत्ताः
विहर्तुमत्यद्भुत रौद्रवृत्ताः ॥ ९ ॥

मत्त प्रमत्तानि समा कुलानि
रथाश्व भद्रासन सङ्कुलानि ।
वीरश्रिया चापि समाकुलानि
ददर्श धीमान् स कपिः कुलानि ॥ १० ॥

परस्परं चाधिक माक्षिपन्ति
भुजांश्च पीनानधि निक्षिपन्ति ।

मत्त प्रलापानधि विक्षिपन्ति
मत्तानि चान्योन्य मधिक्षिपन्ति ॥ ११ ॥

रक्षांसि वक्षांसि च विक्षिपन्ति
गात्राणि कान्तासु च विक्षिपन्ति ।
रूपाणि चित्राणि च विक्षिपन्ति
दृढानि चापानि च विक्षिपन्ति ॥ १२ ॥

ददर्श कान्ताश्च समालभन्त्यः
तथा परास्तत्र पुनः स्वपन्त्यः ।
सुरूपवक्त्राश्च तथा हसन्त्यः
क्रुद्धाः पराश्चपि विनिःश्वसन्त्यः ॥ १३ ॥

महागजैश्चापि तथा नदद्भिः
सुपूजितैश्चापि तथा सुसद्भिः ।
रराज वीरैश्च विनिःश्वसद्भिः
ह्रदो भुजङ्गैरिव निःश्वसद्भिः ॥ १४ ॥

बुद्धि प्रधानान् रुचिराभि धानान्
संश्रद्दधानान् जगतः प्रधानान् ।
नाना विधानान् रुचिराभिधानान्
ददर्श तस्यां पुरि यातुधानान् ॥ १५ ॥

ननन्द दृष्ट्वा स च तान्सुरूपान्
नाना गुणानात्म गुणानुरूपान् ।
विद्योतमानान् स तदानु रूपान्
ददर्श कांश्चिच्च पुनर्विरूपान् ॥ १६ ॥

ततो वरार्हाः सुविशुद्ध भावाः
तेषां स्त्रियस्तत्र महानुभावाः ।
प्रियेषु पानेषु च सक्त भावा
ददर्श तारा इव सुप्रभावाः ॥ १७ ॥

श्रिया ज्वलन्तीस्त्रपयोप गूढा
निशीथ काले रमणोप गूढाः ।
ददर्श काश्चित्प्रमदोप गूढा
यथा विहङ्गाः कुसुमोप गूढाः ॥ १८ ॥

अन्याः पुनर्हर्म्य तलोपविष्टाः
तत्र प्रियाङ्केषु सुखोप विष्टाः ।
भर्तुः प्रिया धर्मपरा निविष्टा
ददर्श धीमान्मदनाभि विष्टाः ॥ १९ ॥

अप्रावृताः काञ्चन राजि वर्णाः
काश्चित्परार्थ्यास् तपनीयवर्णाः ।
पुनश्च काश्चिच्छश लक्ष्म वर्णाः
कान्त प्रहीणा रुचिराङ्ग वर्णाः ॥ २० ॥

ततः प्रियान्प्राप्य मनोभि रामान्
सुप्रीति युक्ताः प्रसमीक्ष्य रामाः ।
गृहेषु हृष्टाः परमाभि रामाः
हरिप्रवीरः स ददर्श रामाः ॥ २१ ॥

चन्द्रप्रकाशाश्च हि वक्त्र माला
वक्राक्षि पक्ष्माश्च सुनेत्रमालाः ।

विभूषणानां च ददर्श मालाः
शतह्रदानामिव चारु मालाः ॥ २२ ॥

न त्वेव सीतां परमाभि जातां
पथि स्थिते राजकुले प्रजाताम् ।
लतां प्रफुल्लामिव साधु जातां
ददर्श तन्वीं मनसाऽभिजाताम् ॥ २३ ॥

सनातने वर्त्मनि सन्निविष्टां
रामेक्षणान्तां मदनाभि विष्टाम् ।
भर्तुर्मनः श्रीमदनु प्रविष्टां
स्त्रीभ्यो वराभ्यश्च सदा विशिष्टाम् ॥ २४ ॥

उष्णार्दितां सानु सृतास्र कण्ठीं
पुरा वरार्होत्तम निष्क कण्ठीम् ।
सुजात पक्ष्मा मभि रक्तकण्ठीं
वने प्रनृत्तामिव नीलकण्ठीम् ॥ २५ ॥

अव्यक्त रेखामिव चन्द्ररेखां
पांसु प्रदिग्धामिव हेम रेखाम् ।
क्षत प्ररूढामिव बाणरेखां
वायु प्रभिन्नामिव मेघरेखाम् ॥ २६ ॥

सीता मपश्यन्मनुजेश्वरस्य
रामस्य पत्नीं वदतां वरस्य ।
बभूव दुःखाभिहतश्चिरस्य
प्लवङ्गमो मन्द इवाचिरस्य ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकिये आदिकाव्ये सुन्दरकाण्डे पञ्चमः सर्गः
॥ ५ ॥